न्तराले तु पूर्णत्वशालः तदूर्द्ध्वं त्रैराशिकेन फलकल्पना।

**दीप्तांशु** पु० दीप्ता अंशवोऽस्य। १सूर्ये “यथा हि दिवि दीप्तांशुः प्रभासयति तेजसा” भा० आ० १७१ अ०। २अर्कवृक्षे च।

**दीप्ताक्ष** पुंस्त्री० दीप्ते अक्षिणी अस्य षच्। १विडाले त्रिका० स्त्रियां ङीष्। २दीप्तलोचनान्विते नृपराक्षसादौ त्रि०। “बाहुः सुन्दरवंश्यानां दीप्ताक्षाणां पुरूरवाः” भा०उ० ७२अ० स्त्रियां ङीष्। “एताश्चान्याश्च दीप्ताक्ष्यः करभोत्कटमूर्द्धजाः” भा०व० २७९अ०

**दीप्ताग्नि** पु० दीप्तोऽग्निरस्य। १अगस्त्ये मुनौ त्रिका० तेन भक्षपीतमात्रेण वातापिससुद्रयोर्जठरानलेन जारणात् तस्य तथात्वम्। २दीप्तजठरानलयुक्ते त्रि० “बलिनः खरभक्ष्या ये ये च दीप्ताग्नयो नराः”। “सात्म्यतोऽल्पतया वापि दीप्ताग्नेस्तरुणस्य च” सुश्रु० कर्म०। ३दीप्ते वह्नौ पु० “सधूमदीप्ताग्निरुचीनि रेजुः” भट्टिः “शब्दान् दीप्ताग्निसङ्काशान्” भा०व०१७अ०।

**दीप्ताङ्ग** त्रि०दीप्तमङ्गमस्य। १दीप्तियुक्तदेहके। २मयूरे पुंस्त्री शब्दच० स्त्रियां जातित्वात् ङीष्।

**दीप्ति** स्त्री दीप–भावे क्तिन्। १त्विषि प्रभायाम् “एवं दीप्त्या योजनं भाति सन्ध्या” वृ०सं०३१अ० २अभिव्यक्तौ च ज्ञानाभिव्यक्तिरूपदीप्तेः कारणानि पात०सू० भाष्ययोरुक्तानि यथा

“योगाङ्गानुष्ठानदशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः” सू० “योगाङ्गान्यष्टावभिधायिष्यमाणानि तेषामनुष्ठानात् पञ्चपर्वणो विपर्ययस्याशुद्धिरूपस्य क्षयो नाशस्तत्क्षये सम्यग्ज्ञानस्याभिव्यक्तिर्यथा यथा च साधनान्यनुष्ठीयन्ते तथा तथा तनुत्वमशुद्धिरापद्यते यथा यथा च क्षीयते तथा तथा क्षयक्रमानुरोधिनी ज्ञानस्यापि दीप्तिर्विवर्द्धते सा खल्वेषा विवृद्धिः प्रकर्षमनुभवति आ विवेकख्यातेरा गुणपुरुषस्वरूपविज्ञानादित्यर्थः। योगाङ्गानुष्ठानमशुद्धेर्वियोगकारणं यथा परशुः छेद्यस्य, विवेकख्यातेस्तु प्राप्तिकारणं यथा धर्मः सुखस्य, नान्यकारणम्। कति चैतानि कारणानि शास्त्रे भवन्ति नवैवेत्याह तद् यथा “उत्पत्तिस्थित्यभिव्यक्तिविकारप्रत्ययाप्तयः। वियोगान्यत्वधृतयः कारणं नवधा स्मृतम्” इति। तत्रोत्पत्तिकारणं मनोभवति ज्ञानस्य, स्थितिकारणं मनसः पुरुषार्थता शरीरस्येवाहार इति अभिव्यक्तिकारणं यथा रूपस्यालोकस्तथा रूपज्ञानम्। विकारकारणं मनसो विषयान्तरम् यथाग्निः पाक्यस्य, प्रत्ययकारणं धूमज्ञानमग्निज्ञानस्य, प्राप्तिकारणं योगाङ्गानुष्ठानं विवेकख्यातेः वियोगकारणं तदेवाशुद्धेः अन्यत्वकारणं, यथा सुवर्णकारः सुवर्णस्य, एवमेकस्य प्रत्ययस्याविद्यामूढत्वे द्वेषो, दुःखत्वे रागः, सुखत्वे तत्त्वज्ञानं माध्यस्थ्ये, धृतिकारणं शरीरमिन्द्रियाणां, तानि च तस्य महाभूतानि शरीराणां तानि च परस्परं सर्वेषाम्। तैर्य्यग्यौनमानुषदैवतानि च परस्परार्थत्वादित्येवं नव कारणानि तानि च यथासम्भवं पदार्थान्तरेष्वपि योज्यानि” भा० स्त्रीणां यौवने अयत्नसाध्ये गुणभेदरूपे ३सत्वजेऽलङ्कारे च “यौवने सत्वजास्तासामष्टाविंशतिसंख्यकाः। अलङ्कारास्तत्र भावहावहेलास्त्रयोऽङ्गजाः। शोभा कान्तिश्च दीप्तिश्च माधुर्यञ्च प्रगल्भता” इत्युपक्रमे “रूपयौवनलालित्यभोगाद्यैरङ्गभूषणम्। शोभा प्रोक्ता, सैव कान्तिर्मन्मथाप्यायिता द्युतिः। कान्तिरेवातिविस्तीर्णा दीप्तिरित्यभिधीयते” सा०द० लक्षयित्वा उदाजहार यथा “तारुण्यस्य विलासः समधिकलावण्यसम्पदो हासः। धरणितलस्याभरणं युवजनमनसोवशीकरणम्”। दीप–कर्त्तरि संज्ञायां क्तिच्। ४लाक्षायां ५कांस्ये च राजनि०। विश्वदेवभेदे पु० “उष्णीनाभो नभोदश्च विश्वायुर्दीप्तिरेव च” भा०अनु०९१अ० विश्वदेवोक्तौ।

**दीप्तिक** स्त्री दीप्त्या कायति कै–क। दुग्धपाषाणवृक्षे राजनि०।

**दीप्तिमत्** पु० दीप्तिरस्त्यस्य मतुप्। दीप्तियुक्ते “तद्गर्भोऽग्निः शतधा भिन्नं ददृशे दीप्तिमन्मुखम्” रघुः। “उदक्स्थो दीप्तिमान् स्थूलो जयी याम्योऽपि यो बली” सू०सि० “दिवश्च्युतैर्भूर्व्वतिदीप्तिमद्भिर्नक्तं ग्रहैर्द्यौरमलप्रदीप्तैः” भा०क०९४अ०। कृष्णस्य सत्यभामायां जाते २पुत्रभेदे पु० कृष्णस्येत्युपक्रमे “जज्ञिरे सत्यभामायां भानुर्भीमवरः क्षुपः। रोहितो दीप्तिमांश्चैव ताम्रजाक्षो जलान्तकः” हरिवं०१६२ अ०।

**दीप्तोद** न० दीप्तमुदकं यत्र उदकस्योदादेशः। तीर्थभेदे “गच्छ पुत्र! नदीं पुण्यां वधूसरकृताह्वयाम्। तत्रोपस्पृश्य तीर्थेषु पुनर्वपुरवाप्स्यसि। दीप्तोदं नाम तत्तीर्थं यत्र ते प्रपितामहः। भृगुर्दैवयुगे राम! तप्तवानुत्तमं तपः। तत्तथा कृतवान् रामः कौन्तेय! वचनात् पितुः” भा०व० ९९अ० [कान्तमणौ (आतशी) राजनि०।

**दीप्तोपल** पु०दीप्तः सूर्यकरसंसर्गात् ज्वलितः उपलः। सूर्य-